# संस्कृतम् (ऐच्छिकम्, कोड-सङ्ख्या - 022)
## आदर्श-प्रश्नपत्रम्
## कक्षा - द्वादशी (2026-27)

**अवधिः – होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः – 80**

**अवधातव्यम् -**

(i) अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।

(ii) **यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।**

(iii) अनुच्छेदं श्लोकं वा आधृत्य ये प्रश्नाः ते अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरदान-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।

(iv) त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।

(v) आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।

(vi) 'ख' खण्डे (रचनात्मक-कार्ये) वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

(vii) **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। परं सम्यक्-प्रश्ननिर्माणं यदा स्यात्तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः।**

**खण्डः - 'क'**

**अपठितावबोधनम् 10 अङ्काः**

| | | |
|---|---|---|
| 1. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) अन्वेषणम्<br>(ii) कन्याकुमार्याः<br>(iii) उन्नत्यवनत्योः | 10<br>2×1=2 |
| | (आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) भारतस्य सञ्चारं कृत्वा विवेकानन्देन नैके अनुभवाः प्राप्ताः।<br>(ii) बाह्यतरङ्गाः, राष्ट्रस्य दुःस्थितिरूपाः आन्तरिकचिन्तातरङ्गाः अपि तस्य चित्तम् अमथ्नन्। | 2×2=4 |

| | | |
|---|---|---|
| | (iii) त्रयाणां समुद्राणां सङ्गमे दीर्घकालं तरणं कृत्वा सः एकस्यां शिलायाम् उपाविशत्।<br>(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत –<br>स्वामी विवेकानन्दः / कन्याकुमार्याः समुद्रतटः / विवेकानन्दस्य साधना अथवा अन्यत् किमपि समुचितं शीर्षकं छात्राः लेखितुं शक्नुवन्ति।<br>(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत-<br>(क) (ii) विवेकानन्दाय<br>(ख) (iv) महिमा<br>(ग) (i) शिलायाम् | 1<br><br>3×1=3 |
| | | |

**खण्डः - 'ख'**

**रचनात्मककार्यम्** **10 अङ्काः**

| | | |
|---|---|---|
| 2. अ | भवान् अनिकेतः। भवतः पिता नूतनं गृहं क्रीतवान्। भवान् गृहप्रवेशोत्सवार्थं निमन्त्रयितुं स्वमित्रं महेशं प्रति पत्रमेकं प्रदत्तसङ्केतानां सहायतया संस्कृतभाषया लिखतु।<br>**अथवा** | 5 |
| आ | भवती सुनृता गोहाटीनगरे निवसति। भवत्याः क्षेत्रे उद्यानस्य समीपवर्ति-क्षेत्रेषु केचन असामाजिकाः जनाः तिष्ठन्ति। ते आदिनं मद्यपानं कुर्वन्तः सामान्यजनान् पीडयन्ति। ते मादकद्रव्याणां प्रयोगं विक्रयणं च कुर्वन्ति। तन्निवारणाय स्वस्य क्षेत्रस्य आरक्षकाधिकारिणं प्रति प्रदत्तसङ्केतानां सहायतया संस्कृतभाषया पत्रमेकं लिखत।<br>छात्राः पूर्णं पत्रं लेखिष्यन्ति। शुद्धपत्राय पूर्णाङ्काः प्रदेयाः। व्याकरणसम्बद्ध-दोषेभ्यः आंशिकरूपेणैव अङ्काः कर्तनीयाः न तु पूर्णाः। | |
| | | |
| 3. अ | प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य विंशतितः पञ्चविंशतिशब्दात्मकम् अनुच्छेदमेकं संस्कृतेन लिखत –<br>**विषयः - जलमेव जीवनम्**<br>जीवने जलस्य महत्त्वम्<br>जनस्य स्रोतांसि<br>जलस्य विवेकपूर्णः प्रयोगः<br>जलप्रदूषणं निवारयितुम् उपायाः<br>उपसंहारः<br>(विषयम् आधृत्य छात्राः सरलम् अनुच्छेदं लेखिष्यन्ति। विषयसम्बद्धतायै 2½ अङ्काः भाषिकशुद्धतायै च 2½ अङ्काः दातव्याः।)<br>**अथवा** | 5 |
| आ | हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत। | |

| | | |
|---|---|---|
| | 1. रामायणं महाभारतं च भारतीयसाहित्यस्य मूलस्रोतसी स्तः।<br>2. भारतस्य पुण्यभूमौ एव वेदानाम् आविर्भावः अभवत्।<br>3. वयं नदीः रक्षेम।/अस्माभिः नद्यः रक्षणीयाः।<br>4. यूयं विद्यालयं कदा गमिष्यथ?<br>5. सर्वे सुखिनः निरामयाः च भवन्तु।<br>(अनुवादे छात्राः पर्यायपदानामपि प्रयोगं कर्तुं शक्नुवन्ति। भिन्नप्रकारेणापि शुद्धवाक्येभ्यः पूर्णाः अङ्काः प्रदेयाः।) | |
| | | |
| | **खण्डः - 'ग'**<br>**अनुप्रयुक्तव्याकरणम्   15 अङ्काः** | |
| | | |
| 4. अ | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।**<br>(क) अद्य कक्षायां **कः + अपि** विशिष्टः कार्यक्रमः?<br>(ख) **वयं सर्वे** योगस्य उपयोगितायाः विषये सम्यग्रूपेण ज्ञातुम् उत्सुकाः स्मः।<br>(ग) जनस्य साकेतनिवासिनस्तौ **द्वौ + अपि** अभूतामभिनन्द्यसत्त्वौ।<br>**अथवा** | 3×1=3 |
| आ | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।**<br>(क) **प्रायस्तव** आगमनसमये अहं न स्थास्यामि।<br>(ख) कार्यं समाप्य स्वगृहं **प्रत्यागमनं + च** तस्य वैशिष्ट्यमासीत्।<br>(ग) शिष्टानध्याय **इत्यस्खलितं** खेलतां बटूनां कोलाहलः। | |
| | | |
| 5. | **रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत।**<br>(क) (ii) कृ + शानच्<br>(ख) (iii) प्राप्तम्<br>(ग) (i) विशिष्ट + टाप् | 3×1=3 |
| | | |
| 6. | **मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत।**<br>(क) अश्वोऽश्व' इति नाम पशुसमाम्नाये सांग्रामिके **च** पठ्यते।<br>(ख) भवादृशा **एव** भवन्ति भाजनान्युपदेशानाम्।<br>(ग) एवं सकलगुणनिवासः स विक्रमो राजा **एकदा** स्वमनस्यचिन्तयत्। | 3×1=3 |
| | | |
| 7. अ | **कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत।**<br>(क) **उपार्जितानां** वित्तानां त्याग एव हि रक्षणम्।<br>(ख) ते **हितवादिने** / **हितवादिभ्यः** कुप्यन्ति। | 3×1=3 |

| | | |
|---|---|---|
| | (ग) अहं तस्मै **राज्ञे** व्ययार्थं रत्नचतुष्टयं दास्यामि।<br>**अथवा** | |
| आ | कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत।<br>(क) अलं **चिन्तया**, अहम् एकैकं कृत्वा बोधयामि।<br>(ख) श्रीनायारः **केरलं** प्रति गमनाय इच्छां न प्रकटितवान्।<br>(ग) दृढसङ्कल्पोऽयं सादी (अश्वारोही) न **स्वकार्यात् / स्वकार्येभ्यः** विरमति। | |
| | | |
| 8. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समस्तपदं वा चित्वा लिखत।<br>(क) (i) न क्षत्रिया<br>(ख) (iv) कर्मकौशलम्<br>(ग) (iii) प्रीतं हृदयं यस्य सः | 3×1=3 |
| | | |
| | **खण्डः - (घ)**<br>(i) **पठितावबोधनम्** 25 **अङ्काः** | |
| | | |
| 9. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) पत्रम्<br>(ii) पर्वतश्रेणीरुपर्युपरि<br>(iii) शिववीरस्य<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) सैनिकस्य ललाट–कपोलौ दूरागमनायासवशेन सूक्ष्म–मौक्तिक–पटलेनेव स्वेदबिन्दु–व्रजेन आच्छादितौ आस्ताम्।<br>(ii) सायङ्कालीनः अन्धकारः द्विगुणितो मेघमालाभिः।<br>(iii) सैनिकस्य कपोलपाली कुञ्चित-कुञ्चितैः कचकलापैः कमनीये स्तः।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) युवा<br>(ii) हयेन<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) झञ्झावातः<br>(ii) युवा | 5<br>2×½=1<br><br><br><br>2×1=2<br><br><br><br><br>2×1=2 |
| | | |
| 10. | अधोलिखितं पद्यद्वयं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - | 5 |

| | | |
|---|---|---|
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) नृपः<br>(ii) इन्दुः<br>(iii) गगने<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) रघु–कौत्सौ साकेतनिवासिनः जनस्य अभिनन्दनीयौ अभवताम्।<br>(ii) नृपः कौत्साय अर्थिकामादधिकं धनम् अयच्छत्।<br>(iii) कलापिनः मित्रं पयोदः अस्ति।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) अभूताम्<br>(ii) अर्थिकामादधिकप्रदः<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) गगने<br>(ii) मित्रम् | 2×½=1<br><br><br><br>2×1=2<br><br><br><br>2×1=2 |
| | | |
| 11. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) अतिजवेन<br>(ii) वत्सस्य<br>(iii) अश्वः<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कौशल्या-अरुन्धती-जनकादयः अरण्यगर्भरूपालापैः तोषिताः।<br>(ii) अश्वस्य प्रत्येकं शतसङ्ख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः आसन्।<br>(iii) 'अश्वमेध' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) अश्वः<br>(ii) आश्वमेधिकः / अयम्<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) मूर्खाः<br>(ii) चपलः | 5<br>2×½=1<br><br><br><br>2×1=2<br><br><br><br><br>2×1=2 |

| | | |
|---|---|---|
| 12. | अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –<br>(क) ईशावास्यमिदं सर्वं यत्किञ्च **कस्यां / कुत्र** जगत्?<br>(ख) समाप्तविद्येन **कस्मै** मया महर्षि-र्विज्ञापितोऽभूद?<br>(ग) भगवतः सुगृहीतनामधेयस्य **कस्य** शिष्योऽहम्?<br>(घ) **केन** एव हि संसिद्धिमास्थिता जनकादयः? | 4×1=4 |
| 13. | अधोलिखितस्य श्लोकस्य अन्वयं लिखत।<br>**अन्वयः** - लक्ष्मीः स्वयम् उत्साहसम्पन्नम् अदीर्घसूत्रम् क्रियाविधिज्ञम् शूरम् कृतज्ञम् दृढनिश्चयम् व्यसनेषु च असक्तम् वासहेतोः वाञ्छति। | 3 |
| | | |
| 14. अ | अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत।<br>छात्राः श्लोकस्य भावार्थं संस्कृतेन स्वयं लेखिष्यन्ति। समुचितभावार्थाय पूर्णाः अङ्काः प्रदेयाः। व्याकरणिकाशुद्धीनां कृते आंशिकरूपेण अङ्काः कर्तनीयाः।<br>**अथवा** | 3 |
| आ | 'शुकनासोपदेशः' इति पाठम् आधृत्य "युवावस्थायाः केषां दोषाणां विषये शुकनासः चन्द्रपीडम् उपदिष्टवान्?" इति सङ्क्षेपेण संस्कृतभाषया लिखत।<br>'शुकनासोपदेशः' इति पाठम् आधृत्य मन्त्रिणा शुकनासेन प्रदत्तोपदेशस्य सारं छात्राः सङ्क्षेपेण संस्कृतभाषया लेखिष्यन्ति। समुचिततथ्यानां कृते पूर्णाः अङ्काः प्रदेयाः। व्याकरणिकाशुद्धीनां कृते आंशिकरूपेण अङ्काः कर्तनीयाः। | |
| | | |
| | **खण्डः - (घ)**<br>(ii) **संस्कृत–साहित्येतिहासस्य सामान्यः परिचयः 10 अङ्काः** | |
| | | |
| 15. | अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत।<br>(क) (ii) अष्टादश<br>(ख) (i) भारवेः<br>(ग) (iv) माघः | 3×1=3 |
| | | |
| 16. | प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत।<br>(क) (i) विक्रमादित्यस्य<br>(ख) (ii) हम्मीर-महाकाव्यम्<br>(ग) (iii) गद्यपद्यमयम् | 3×1=3 |
| | | |

| | | |
|---|---|---|
| 17. | प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत।<br>(क) (iii) वेणीसंहारम्<br>(ख) (ii) नाट्यशास्त्रम्<br>(ग) (iii) अश्वघोषः<br>(घ) (i) भवभूतिः | 4×1=4 |
| | | |
| | **खण्डः -'ङ'**<br>**छन्दोऽलङ्कारपरिचयः - 10 अङ्काः** | |
| | | |
| 18. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत।<br>(क) तस्मादसक्तः सततं कार्यं कर्म समाचर ।<br>(ख) ननमयययुतेयं मालिनी भोगिलोकैः।<br>(ग) ऽ।ऽ<br>(आ) अधोलिखितश्लोकपङ्क्तिषु प्रयुक्तं छन्दः परिचीय तस्य नाम लिखत।<br>(क) शिखरिणी<br>(ख) उपजातिः | 3×1=3<br><br><br><br>2×1=2 |
| | | |
| 19. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत।<br>(क) साधर्म्यमुपमा भेदे।<br>(ख) श्लेषालङ्कारस्य<br>(ग) भवेत् <u>**सम्भावनोत्प्रेक्षा**</u> प्रकृतस्य परात्मना।<br>(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत।<br>(क) यमकः<br>(ख) उपमा | 3×1=3<br><br><br><br>2×1=2 |

************************************